International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(4): 29-32
© 2023 IJSR
www.anantaajournal.com
Received: 25-03-2023
Accepted: 10-05-2023

**रा. गुरुप्रसादः**
शोधच्छात्रः, संस्कृतविभागः, मद्रास् विश्वविद्यालयः, चेन्नई, तमिलनाडु, भारत

**Corresponding Author:**
**रा. गुरुप्रसादः**
शोधच्छात्रः, संस्कृतविभागः, मद्रास् विश्वविद्यालयः, चेन्नई, तमिलनाडु, भारत

# संस्कृतसाहित्यस्य प्राचीनमध्यकालीनयोः जैवविविधता तत्संरक्षणञ्च

**रा. गुरुप्रसादः**

**सारांश**
भारतीयदर्शनेषु कस्याश्चिदपि शाखायाः मूलभूतस्य तत्त्वस्य गवेषणे, इदं ज्ञातुं शक्यते यत् समस्तस्य प्रपञ्चस्य आधारस्तम्भाः सन्ति जीवचराचराः। तादृशप्रपञ्चः चिदचिदात्मकः वरीवर्ति। चिच्च सुर-नर-तिर्यक्-स्थावरभेदैः चतुर्धा विभक्तोऽस्ति। तेषु आदिमत्रयम् अन्तिमत्रयाद्भिन्नम्। तस्य आदिमत्रयस्थितिस्तु स्वयं भवति। एवं चित्सु नरस्तु सृष्टौ आदिमसोपाने वरीवर्ति। स च अन्यैः चिद्भिः सह अस्त्यादीन् षड्भावविकारान् प्राप्नोति। पुनश्च स एव नरः परमात्मनः प्रतिबिम्बरूपस्तिष्ठति जगत्यस्मिन्। तथापि एतस्मिन्प्रपञ्चे चिद्विशेषाः स्थावराश्च नरैः सह सम्मील्य एकं साम्राज्यं चालयति इति कथने न कापि न्यूनता। तथाभूतवृक्षस्य, तत्सम्बद्धजैवविविधतामधिकृत्य किञ्चिदिव वृक्षस्य देवतात्वम्, वृक्षारोपणनियमाः, वृक्षारोपणस्य महत्त्वमित्याद्युपशीर्षकेषु शोधप्रबन्धेऽस्मिन् उपपाद्यन्ते।

**कूटशब्दः**: जैवविविधता, वृक्षायुर्वेदः, वृक्षारोपणम्, बीजसंरक्षणम्, चिकित्सा इत्यादीनि

## प्रस्तावना
संस्कृतसाहित्यस्य प्राचीनकाले मध्यकाले च अतिमहत्त्वयुक्तं स्थानामावहति वृक्षायुर्वेदः। अस्य "वृक्षायुर्वेदः" इति पदस्य वाच्यार्थस्तु "वृक्षजीवनज्ञानम्" इति। अस्मिन् वृक्षायुर्वेदशास्त्रे वनस्पतिविकृतिविज्ञानं वा वृक्षाणां चिकित्साविषये वा विचारः सामान्यतया विहितः अस्ति। अस्मिन् शास्त्रे जैवविविधतायाः (Biodiversity) संरक्षणस्य च अवधारणाः समाविष्टाः सन्ति। वृक्षायुर्वेदसम्बद्धतया ये विषयाः षष्ठशतकीयस्य वराहमिहिरस्य बृहत्संहितायां चतुर्दशशतकीयस्य शार्ङ्गधरस्य संहितायां चर्चिताः सन्ति, तेषु कतिपयान् अंशान् अत्र प्रस्तोतुं यत्नः क्रियते।

भारते वृक्षायुर्वेदस्य दीर्घः इतिहासः वरीवर्ति। तत्र ऋग्वेदे "शं न ओषधीर्वनिनो भवन्तु। शं नो रजसस्पतिरस्तु विष्णुः[1]" इति। अस्य तात्पर्यन्तु ओषधयः वनस्पतयश्च अस्मासु दयां कुर्वन्तु, सर्वप्रदेशविभुः अस्मासु कृपां करोतु इति। एवं वनस्पतीनां रोगविशेषाः, एवं तेषां रोगविशेषाणाम् उपशमनाय चिकित्साप्रकाराश्च अथर्ववेदे समुद्दिष्टाः सन्ति। तत्र अथर्ववेदीय एकोनत्रिंशत्सङ्ख्याकप्रश्ने सप्तममन्त्रे (२९.७) उल्लेखः धान्यनाशककीटैः धान्यानां विनाशः भवति इति सूचितमस्ति। तत्रैव भाष्यकारः सायणाचार्यस्तु दीर्घसूचीं प्रददाति सस्यनाशककीटानां विषये।

[1] ऋ.वे.सं. – ७.३५.५

## वृक्षायुर्वेदस्य विविधाः सन्दर्भसूचयः

सामान्ययुगस्य पूर्वं तृतीयशतकीयस्य कौटिल्यस्य अर्थशास्त्रे गुल्मवृक्षायुर्वेदः इति नाम्नि पृथग्विभागः उपकल्पितोऽस्ति। एवं सामान्ययुगस्य द्वितीयशतके चरकसंहितायां चरकाचार्येण कल्पस्थाने प्रथमाध्याये उपवर्णितः अस्ति। एवं सुश्रुतसंहितायां सूत्रस्थाने सप्तत्रिंशदध्याये वृक्षायुर्वेदमधिकृत्य विशेषतया विचाराः कृताः सन्ति। अस्मिन् क्रमे द्वितीयशताब्दौ अग्निपुराणे तथा केषुचित् अन्यायुर्वेदग्रन्थेषु शाकौषधीनामाधारभूतायां सिकताप्रकृतौ वनस्पतिरोगस्य उपचारः दरीदृश्यते। पञ्चमशताब्दौ अमरसिंहकृतामरकोषग्रन्थे औषधिवर्गः इति पृथग्वर्गः वृक्षायुर्वेदीय एव समुपलभ्यते यत्र वनस्पतीनां सूची, जीवविशेषाश्च वर्णिताः सन्ति। एवं सामान्ययुगस्य द्वादशशतके शूरपालस्य अथवा सुरेश्वरस्य वृक्षायुर्वेदः इति ग्रन्थः समुपलभ्यमानोऽस्ति। तथा पराशरस्य कृषिपाराशर्यम्, कश्यपस्य कृषिसूक्तिः इत्यादयः ग्रन्थाः वनस्पतीनां विकृतिविज्ञानविषये समुपलभ्यमानाः सन्ति।

सामान्ययुगस्य पञ्चदशशतकीयः गुणरत्नः षड्दर्शनसमुच्चयग्रन्थस्य व्याख्यानभूते तर्करहस्यदीपिकाग्रन्थे वनस्पतिजीवनस्य वृद्धेः विभिन्ना अवस्थाः, रोगप्रतिरोधः, औषधस्य प्रयोगेन व्रणनिवारणम् इत्याद्यंशाः उपकीर्तिताः सन्ति। एवं षोडशशतीकीयग्रन्थेष्वपि उदाहरणतया तिरुमङ्गलम् नीलकण्ठमूसतेन विरचिते वास्तुशिल्पशास्त्रसम्बद्धे मनुष्यालयचन्द्रिकाग्रन्थे वृक्षायुर्वेदीयाः केचन बिन्दवः चर्चिता इति तच्छास्त्रसम्बद्धकृतगवेषणादिद्वारा अस्माभिः अवगतिविषयो भवति।

## वृक्षस्य देवतात्त्वम्

वृक्षाणां पादपानां च पूजा प्राचीनभारतीयसंस्कृतेः अत्यावश्यकः भागः आसीत्। बृहन्ति वनानि अथवा वृक्षषण्डाश्च “नागाः” अथवा “नागवनम्” आहोस्वित् “सर्पकाडु” इति व्यपदिश्यते केरलादि प्रदेशेषु। अत्रापि द्रविडप्रदेशे नागवनम् इति नाम्नैव व्यपदेशः अस्ति इति श्रूयते। कैरलीयपरम्परानुसारं यः नरः चिरं जीवतुम् इच्छति, तस्य जन्मनक्षत्रानुसारं वृक्षं रक्षेत्। सप्तविंशतिनक्षत्रानुसारं वृक्षाणां सूची समुपदिष्टा अस्ति। तेषु केचन -

(१) अश्विनी - खदिरः / बालपत्रम् (२) भरणी - गायत्री (३) कृत्तिका - वंशः (४) रोहिणी - अश्वत्थः इत्येवमादयः।

अत्र अस्माभिः एवं निष्कर्ष्यते यत् एतादृशस्य मानवविश्वासस्य फलस्वरूपन्तु वृक्षाणां रक्षणं भवति इति। एतेन जैवविविधतापि सुनिश्चिता भवति। मनुष्यालयचन्द्रिकाग्रन्थे [2] आवासीयभवनस्य परिसरे वृक्षाणां स्थानानि क्वचित् इष्टानि क्वचिच्च अनिष्टान्यपि भवन्ति।

## गृहे वृक्षोरोपणनियमाः

गृहस्य उत्तरे शीतलवायुप्रतिरोधाय स्थूलपर्णयुक्ताः वृक्षाः आरोपयितुम् निर्देशः विद्यते। यदा दक्षिणगोलार्धे सूर्यः भ्रमति तिन्त्रिणीवृक्षा इव पत्राणि येषां, ते वृक्षाः स्थूलपर्णहीनाः गृहस्य दक्षिणे रोपणीयाः सन्ति येन शिशिरऋतौ सूर्यप्रकाशः गृहस्य अन्ते आगच्छेत्। फलयुक्ताः वृक्षाः ये काष्ठकोरप्रकाराः सामान्यतया कठोरतया भवन्ति, तादृशाः गृहस्य अत्यन्तं समीपे रोपयितुं शक्यन्ते। येषां वृक्षाणां सम्पर्केन प्रत्यूर्जता (Allergy) भवति, यथा बल्लाटकः (*Semecarpus anacardium*) तथा ये अशुभफलाः भवन्ति, तान् भूखण्डे कुत्रापि न रोपयेत्। वृक्षायुर्वेदीयसंरचनायाः आधारेण वृक्षाः कठोरकाष्ठानुसारं चतुर्षु प्रकारेषु विभक्ताः भवन्ति।

यथा –

1. अन्तःसारः - कठोरकाष्ठाः अर्थात् मुख्यांशेन कठोरकाष्ठाः भवन्ति।
2. बहिस्सारः - बाह्यरूपेण कठोरकाष्ठाः भवन्ति।
3. सर्वसारः - सर्वत्र कठोरकाष्ठाः।
4. निस्सारः - मृदुकाष्ठाः भवन्ति।

एतेषु चतुर्षु गृहस्य अन्तः निस्साराख्यवृक्षाः प्ररोपणीयाः यथा - पनसवृक्षः यस्य काष्ठः मृदुः भवति। एवं ततः किञ्चित् दूरे सर्वसारवृक्षाः तिन्त्रिण्यादय आरोपणीयाः। ततः बहु दूरे बहिस्सारान्तसाररूपवृक्षाः आरोपणीयाः।

बृहत्संहितायाः एकोनत्रिंशोऽध्यायः कुसुमलताध्यायः इति नाम निर्दिष्टमस्ति। अस्य अध्यायस्य विषयः निश्चितस्य पुष्पाणां वृक्षाणां च जैविककालचक्रस्य, वातावरणानुगुणं सस्योत्पादनस्य च अवलोकनं क्रियते। बृहत्संहितायाः कुसुमाध्यायस्य २ - १४ श्लोकेषु केषाञ्चित् पुष्पाणां वा फलानां वा विकासवृद्ध्या, धान्यविशेषस्य वा द्विदलविशेषस्य अथवा सस्यानां बृहत् परिमाणं, धातुः, वस्तूनि, व्यक्तयः इत्यादयः अनेके विषयाः पूर्वमेव अनुमातुं शक्यन्ते। अस्य तात्पर्यमिदमस्ति यत् केषाञ्चन वनस्पतीनाम् उपस्थितिः सूचकत्वेन कार्यं करोति येन अन्येषां केषाञ्चन वनस्पत्यादीनां वृद्धिः पूर्वम् अनुमीयते। पूर्वोक्तविषयेषु किमपि वैज्ञानिकतत्त्वम् अस्ति वा इति अन्वेषणं आधुनिकवैज्ञानिकानां दायित्वम् अस्ति। सम्प्रति अत्र बृहत्संहितायाः शार्ङ्गधरसंहितायाः वृक्षायुर्वेदस्य केषाञ्चित् बिन्दूनाम् सङ्क्षिप्ततया अवलोकनं कुर्मः। अधोनिर्दिश्यमानां बिन्दूनामाधारेण वृक्षाणां वनस्पतीनां च जीवनविषयाः स्पष्टीकर्तुं प्रयत्नः विधीयते।

[2] म.च.अ. - १२३-१२६

## वृक्षारोपणस्य महत्त्वम्

वराहमिहिराचार्यः बृहत्संहितायाः वृक्षायुर्वेदाध्यायस्य प्रारम्भ एव अस्मान् उद्बोधयति यत् तडागस्य सरोवरस्य तीरे उद्याननिर्माण महत्त्वं सूचयति यतः तानि उद्यानानि न भविष्यन्ति चेत् तेषां पार्श्वे स्थितः तडागः आहोस्वित् सरोवरो वा छायारहितः द्रष्टुं सुन्दरः न भाति। एतत्कथनेन स्पष्टं भवति यत् जलाशये उद्यानानि परस्परं लाभप्रदं भवन्ति। पर्यटनस्य दृष्ट्या अपि एतत् महत्त्वपूर्णम् अस्ति। तथा च अद्यत्वे अस्य अवलोकनस्य अतीव प्रासङ्गिकता अस्त्येव। अस्मिन्नेव विषये शार्ङ्गधरः वृक्षाणां महिमानं प्रशंसति। वस्तुतः तस्य शार्ङ्गधरसंहितायां वृक्षायुर्वेदाध्याये वृक्षारोपणमहिम्नः कृते एकं सम्पूर्णं भागं समर्पयति - तरुमहिमा इति[3]। मार्गस्य उभयोः पार्श्वयोः यत्र बहवः जनाः छायायाः अधः विश्रामं कुर्वन्ति, तत्र वित्तगुणविवर्जितानां पुत्राणां प्राप्त्यपेक्षया वृक्षारोपणं श्रेयस्करं भवति।

गुणदृष्ट्या पर्यालोचयामः चेत् तडागस्य उत्खननं तावत् दशकूपमज्जनतुल्यं भवति। एकं सरः दश तडागानां तुल्यं भवति। एकः पुत्रः च दश सरोवरतुल्यः भवति, तथा एकः वृक्षः दशपुत्रसमः उत्तमः भवति। शार्ङ्गधरोऽपि कस्यचित् विशेषप्रकारस्य वृक्षरोपणस्य गुणान् प्रकाशयितुं प्रवर्तते। अस्माभिः पूर्वमेव दृष्टमस्ति यत् मनुष्यालयचन्द्रिकायामपि वृक्षारोपणस्य महत्त्वं विचारितमस्तीति।

## वृक्षारोपणप्रकारः

बृहत्संहितायाः अनुसारेण अस्माभिः वृक्षारोपणात् पूर्वमेव भूमौ मृत्तिका सज्जीकर्त्तव्या भवति। पूर्वतने काले प्रदूषणसमस्योत्पादकानां कीटनाशकानां प्रयोगस्य स्थाने पारम्परिकः विधिः [4] प्रयुक्तः आसीत् यस्मिन् विधौ तिलबीजानि क्षेत्रे रोपयित्वा यदा तेषां वनस्पतयः पुष्प्यन्ति, तदा तान् मर्दयित्वा मृत्तिकाभिः सह संयुज्यन्ते। समतलभूमौ द्विदलानि तिलानि च रोपणीयानि। ततः हलेन खननं कृत्वा सस्यानि छित्त्वा ततः पुनः वृक्षारोपणं कुर्यात्॥

आधुनिकवैज्ञानिकानुसन्धानानाम् अनुसारं तिलस्य मूले सूक्ष्मतया रोगाणूनां धारणं कुर्वन्ति। एवं तेषां रोगाणूनां द्वारा नाइट्रोजन क्षारं मोचयन्ति, येन भाविनि क्षेत्रे प्ररोप्यमानानां वनस्पतीनां वृद्धिं कारयितुं सहायकाः भवन्ति। अद्यत्वेऽपि एतस्याः पर्यावरण-अनुकूल-पद्धतेः प्रासङ्गिकता अस्ति। एवं बृहत्संहितायाम् उद्यानेषु गृहपरिसरेषु वा प्रथमं रोपणीयानां शुभफलप्रदायकवृक्षाणां लतानां च सूची दत्तास्ति। तत्र वरत्वक् (Neem - *Azadirachta indica*), अशोकः (*Saraca asoca*), पुन्नागः (*Calophyllum inophyllum*), शिरीषवृक्षः एवं प्रियङ्गु (*Agaaia roxburghiana*) लता च इत्यादयः निर्दिष्टाः सन्ति। कश्यपः अस्यामेव सूच्याम् अन्यान् काञ्चन वनस्पतिविशेषान् योजयति, यथा - चम्पकम्, उदुम्बरः (*Ficus racemosa*) एवं पारिजातम् (*Erythrina indica*)। ततः कश्यपाचार्येणैव पूर्वोक्ताः सर्वे मन्दिरेऽपि रोपयितुमर्हाः सन्ति इति सूचिताः।

## वृक्षाणां संरक्षणम्

अयं विषयः यद्यपि बृहत्संहितायां न निबद्धः तथापि शार्ङ्गधरसंहितायां वृक्षस्य चिकित्सार्थं खण्डद्वयं समर्पयति शार्ङ्गधरः। अत्र वनस्पतेः जलदानस्य वृक्षाणां संरक्षणस्य च नियमाः विधीयन्ते। तेषु नियमेषु नूतनतया आरोपिताः वृक्षाः प्रातः सायं च सेचनीयाः। ते वृक्षाः शैत्यात्, कर्षणात्, वायोश्च रक्षणीयाः भवेयुः। शरदृतौ शिशिरर्तौ च दिनद्वये एकवारं वृक्षाः वनस्पतयः च सेचनीयः; एवं प्रतिदिनं वसन्तर्तौ एकवारम् ग्रीष्मकाले द्विवारं च सेचनीयाः। वर्षायां शरत्काले च यदा न वर्षति, तदा वृक्षस्य अधः वृत्तं खातं जलेन पूरयेत्। यावत् वृक्षमूलानि पृथिव्यां सक्तानि आर्द्राणि भवन्ति तावत् जलं पातयेत्। अत्र प्रयुक्तस्य जलस्य परिमाणस्य विषये मनसि चिन्ता मा कुरुत। वृक्षाणामजीर्णत्वात् खातेषु जलं न शुष्यति। तस्मिन् सन्दर्भे यावत् तन्न शुष्कं भवति, तावत् नवजलं क्वचिदपि न पातयेत्। वृक्षाणां हितार्थं (संवर्धनार्थम्) तेषां पार्श्वे वर्धमानानि तृणानि, लताः गुल्मान् च निष्कासयेत्। वृक्षाः सावधानतया प्रणाशप्रभावयुक्तशिशिरात् प्रबलवायोः धूमात् अग्नेः ऊर्णायोः सकाशात् रक्षिताः भवेयुः। वृक्षाः खातान् निर्मीय भित्तिभ्यः सुरक्षितव्याः। विद्युद्द्वारा आहतानां वृक्षाणां भस्म सङ्गृह्य अन्यान् वृक्षान् परितः समानतया क्षिपन्तु येन भाविनि काले यदि वृक्षाः अग्निना दह्यमाना अपि भस्मनः प्रभावेन सुरक्षिताः भविष्यन्ति वृक्षाः। अनेन भस्मसु ज्वलन्तमपि अग्निशमयितुं सामर्थ्यं वर्तते इति ज्ञायते। अन्यत् विधानमस्ति यत् श्वेतसालि-तण्डुलं दधि-शिला-लवण-मिश्रितं वृक्षान् परितः क्षिपेत् येन भविष्यति वर्षाभ्यः जायमानेन विषयुक्तेन वा हानिकारकेण वा पदार्थेन बाधः नैव सम्भवति।

## वृक्षाणां प्रजननम्

अस्मिन् विषये बृहत्संहितायाम् एवं शार्ङ्गधरसंहितायाञ्च वृक्षाणां प्रजननाय चतस्रः पद्धतयः वर्णिताः सन्ति - ताश्च (१) सङ्क्रमणविरूपणम् (२) बीजवपनम् (३) छेदनम् (४) प्रसारणम् च

### १) सङ्क्रमणविरूपणम्

सङ्क्रमणविरूपणं नाम एकस्मात् प्रदेशात् वृक्षम् आनीय अन्यस्मिन् प्रदेशे वृक्षारोपणम् इत्यर्थः। भारते अस्याः पद्धत्याः दीर्घः इतिहासः अस्ति। अशोकस्य शासनकाले अतिदुर्लभः औषधमूलफलानि यत्र यत्र न सन्ति तत्र आनीय प्रत्यारोपितानि आसन्। वृक्षारोपणात् परं पुनः कीटानां बाधः न भवेत् इत्यत्र सावधानतया भाव्यम्।

---

[3] शा.सं. – श्लो. ४ - २३।

[4] शा.सं. अयमेव विधिः अनुसृतः अस्ति।

एतदर्थम् एकप्रकारकं लेपनं निर्मीयते यदर्थम् समानपरिमाणे घृतम्, उषीरः (*Vetiveria zizanioides*), तिलम्, मधु, विडङ्गम् (*Embelia ribes*), गोक्षीरं एवं वत्सस्य गोमयम् इत्यादीनि मिश्रीक्रियन्ते। इदं लेपनं यस्य वृक्षस्य सङ्क्रमणं क्रियते, तस्मिन् संपूर्णतया लेपनीयं भवति। अत्र सङ्क्रमणेऽपि प्राचीनकृषकाः समयनियमान् परिपालयन्ति स्म। तच्च येषां वृक्षाणां शाखाः अविकसिताः भवन्ति, ते शिशिरर्तौ अर्थात् जनवरीफरवरीमासाभ्यन्तरे सङ्क्रमितव्याः। एवं विकसितशाखाः वृक्षाः हेमन्तर्तौ नवम्बरदिसम्बरमासयोः, ये च वृक्षाः सुविकसितशाखाः ते वर्षर्तौ जुलाई-अगस्तमासयोः रोपितव्याः।

## २) वपनम्

बृहत्संहितायां कथ्यते यत् बीजानि दशदिनानि यावत् क्षीरे सिञ्चन्तु। ततः घृतलिप्तहस्तेन तानि बीजानि नित्यं संगृह्यताम्। ततः गोमयेषु बहुवारं भूमिकां कुर्वन्तु। शूकरमृगमांसेन तान् धूपयेत्। मांसेन शूकरमज्जया च बीजानि तिलोपचारेण पूर्वमेव सज्जीकृतायां मृत्तिकायां रोपयेत्। तेषाम् उपरि क्षीरजलेन प्रोक्षयेत्। ते शीघ्रमेव वर्धयिष्यन्ति, पुष्पन्ति च न संशयः। कठिनांशविशिष्टेष्वपि तिन्त्रिणीबीजेषु अङ्कुरं प्ररोहेत्, यदि तानि तण्डुलस्पिष्ट-कृष्णचणक-तिल-यवगुरुमिश्रेण प्रतिदिनं सिञ्चन्ति।

## ३) छेदनम्

पनसवृक्षः, अशोकवृक्षः, कदलीवृक्षः, जम्बूवृक्षः, लाकुचः (Anneli- *Artocarpus lakoocha*), दाडिमः, द्राक्षा, जम्बीरवृक्षः, मल्लिकालता च इत्येते काण्डानां छेदनोत्तरं गोमयेन लिप्तानि रोपयितुं शक्यन्ते।

## ४) प्रसारणम्

बृहत्संहितायां वृक्षाणां प्रजननाय वृक्षप्रसारणं नाम काचित् पद्धतिः समुद्धृता अस्ति। अत्र प्रसारणस्य प्रविधिद्वयं अनुशंसति ग्रन्थकारः। तौ च (i) वृक्षस्य छेदनं कृत्वा मूले सम्मिलीकरणम् (ii) वृक्षस्य छेदनं कृत्वा अन्यस्य वृक्षस्य काण्डे निवेशनम्। अयमेव व्याख्याकारः "उत्पलः" इति कथयति।

## उर्वरकम्

बृहत्संहितायां वृक्षाणां पुष्पाणां फलानां च उत्पादनं वर्धयितुं विशेषं उर्वरकम् विहितमस्ति। पञ्चलिटरपरिमितं मेषस्य एवम् अजस्य शकृच्चूर्णम्, पञ्चलिटरपरिमितं तिलचूर्णम्, सपादएकलिटरपरिमितः गोधूमकणः, नवलिटरपरिमितः गोमांसः, विंशतिलिटरपरिमितं जलं सम्मिश्रणं कृत्वा सप्तरात्रं यावत् स्थापनीयम्। वृक्षवनस्पतिलताः अनेन द्रवविशेषेण सर्वेषु ऋतुषु अपि सेचनीयाः। कश्यपोऽपि वृक्षाणां शीघ्रवृद्धये तदेव उर्वरकं प्रशंसति।

## बीजानां संरक्षणम्

बृहत्संहितायां मतानुसारं सामान्यतः वृक्षाणाम् एवं वनस्पतीनां बीजानि अधोलिखितप्रकारैः संरक्षणीयानि - यस्य कस्यापि वृक्षस्य अथवा वनस्पतेः बीजसंरक्षणाय जलेन साकं अहकोला नाम फलविशेषरसम् अथवा स्लेष्मतकम् इति वृक्षस्य तैलविशेषं बीजस्योपरि सेचनीयम्। ततः बीजस्य रोपणं कर्तव्यम्। स्लेष्मतिलकबीजविषये कथयति ग्रन्थकारः - बीजानां शङ्खं (Shell) निष्कास्य अहकोलाफलरसे निमज्जनं कृत्वा छायायां शोषयितव्यम्। तथैव सप्तवारं कुरुत। महिषगोमयेन लिप्तं महिषगोमय एव स्थापितानि बीजानि वपनं कर्तुं सिद्धानि भवेयुः।

## उपसंहारः

पूर्वोक्तवत् इतोऽपि बहवः बिन्दवः इतोऽपि प्रतिपादनाय गवेशनाय सन्ति। तथापि अत्र उपर्युक्तावलोकनद्वारा इदं स्फुटं भवति यत् - वृक्षाणाम् उपचाराय प्रवृत्तानां साहित्यिकसामग्रीणां जैवविविधतासहिते तत्संरक्षणे प्राचीनमध्ययुगीनसंस्कृतकृतीनां अधिकांशतया प्रासङ्गिकता विद्यते इत्यत्र नास्ति लेशोऽपि संशीतिः। इति शम्॥

## सङ्केताक्षरसूची

१. ऋ.वे.सं. – ऋग्वेदसंहिता
२. शा.सं – शार्ङ्गधरसंहिता
३. म.च.अ. – मनुष्यालयचन्द्रिका - अध्यायः

## ससन्दर्भग्रन्थसूची


१. शार्ङ्गधरसंहिता – भिषग्वरशार्ङ्गधराचार्यः (दीपिकागूढार्थदीपिकाभ्यां सहिता) – पण्डित् जावजी – निर्णयसागर् प्रेस् – मुम्बई – १९३१.

२. बृहत्संहिता (पूर्वार्द्धा) – वराहमिहिरः (भट्टोत्पलविवृतिसहिता) – अच्युतानन्द झा – चौखम्बा विद्याभवन – वाराणसी – २०१४.

३. मनुष्यालयचन्द्रिका – संपादकः – टी. गणपतिशास्त्री – दि सुप्रिडेन्ट्, ट्रिवेण्ड्रम् गवर्मेण्ट् प्रेस्, १९१७.

४. पाराशरोपपुराणम् – सम्पादकः कपिलदेवत्रिपाठी – सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी – १९९०.